2025_26_PE-I

EDUTECH ACADEMY
NURTURING THE FUTURE....

SET : 01

— SCHOOL SECTION —

STD : X CBSE

# PRE EXAM – I

TIME : 3:00 Hrs

SUB : SANSKRIT (122)

DATE : 2nd December, 2025

MM :80

**सामान्यनिर्देशाः-**

**अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।**

- 'क' खण्डः : अपठितावबोधनम् (10 अङ्काः)
- 'ख' खण्डः : रचनात्मककार्यम् (15 अङ्काः)
- 'ग' खण्डः : अनुप्रयुक्तव्याकरणम् (25 अङ्काः)
- 'घ' खण्डः : पठितावबोधनम् (30 अङ्काः)

❖ प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

❖ उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः

❖ प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।

❖ सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

❖ प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## 'क' खण्डः
## अपठितावबोधनम्। (10 अङ्काः)

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।**

एकदा एकः विदेशीयः भारतम् आगतः। अत्रागत्य निवसन्तं तं विदेशीयं तस्य भारतीयं मित्रमपृच्छत् भारतभूमौ निवासेन भवतः विचारेषु किञ्चित् परिवर्तनम् किम्? विदेशीयेन उक्तम्- मूलभूतं परिवर्तनं जातम्। आस्तिकः सञ्जाता अहम् । अतीव प्रसन्नः सन् भारतीयः अवदत्- एतदेव मम भारतस्य धर्म प्राणता। परम एतादृशां परिवर्तनं कथं जातम्? सोऽवदत्- नात्र मया कोऽपि परिश्रमेण सत्येन च कार्यं कुर्वन् दृष्टः तथाऽपि सर्वे पूर्णोदरं भुञ्जन्ति अवश्यमेव कोऽपि अलौकिक शक्ति सम्पन्नः, भारतपक्षपाती, अकर्मण्य – कृपालुः। सः च ईश्वरं विहाय कोऽन्यः भवितुम् शक्नोति? भारतीयं मित्रं सलज्जः तूष्णीं च अभवत्।

**I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम् )** **(1 × 2 = 3)**

(i) विदेशीयस्य विचारेषु कीदृशं परिवर्तनम् अभवत्?

(ii) विदेशीयम् आस्तिकं दृष्ट्वा कः प्रसन्नः आसीत्?

(iii) एकदा एक: विदेशीयः कुत्र आगतः?

**II. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम् )** **(2 × 2 = 4)**

(i) भारतीय विदेशीय मित्रं किम् अपृच्छत्?

(ii) प्रसन्नः सन् भारतीय किम् अवदत्?

(iii) कः अतीव प्रसन्नः सन् अवदत्?

**III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।** **(1 × 1 = 1)**

**IV. यथानिर्देशम् उत्तरत। (केवलं प्रश्नत्रयम्)** **(1 × 3 = 3)**

(i) 'खादन्ति' इति क्रियापदस्य पर्यायपदं चित्वा लिखत।

(क) शक्नोति (ख) भुञ्जन्ति (ग) पिबन्ति (घ) अभवत्

(ii) 'आगत:' इत्यस्य कर्तृपदं किम्?

(क) एकदा (ख) विदेशीयः (ग) वैदेशिका: (घ) धार्मिक:

(iii) 'नास्तिक' अस्य विपर्ययपदं किम्?

(क) साहसिकः (ख) आस्तिक: (ग) पर्यावरणम् (घ) यतः

(iv) 'परिवर्तनं' इति विशेष्यपदस्य किं विशेषणपदं ?

(क) निवसन्तं (ख) विदेशीयं (ग) भारतीयं (घ) मूलभूतं

**(खंड 'ख')**

**रचनात्मकं कार्यम् । (15 अङ्का:)**

**2. अ. राजकुमारः मिश्र भवान् इण्टरनेट बैंकिंग माध्यमेन स्वभ्रातरं प्रति दशसहस्रं रूप्यकाणि प्रेषयितुम् इच्छति अतः धनादेशं दातुं स्वक्षेत्रस्य डाकपालम् इदं पत्रं मञ्जूषायाः सहायतया लिखत। (5)**

**[मञ्जूषा – दशसहस्रम् रूप्यकाणि, शुल्कस्य, प्रक्रिया, महाराष्ट्र, आभारी, धनम् डाकपाल महोदया:, राजकुमारः मिश्र, अहमदाबादम्।]**

**अथवा**

**आ. स्वस्य यात्रा विषये मित्रं प्रति मञ्जूषायां प्रदत्त शब्दानां सहायतया एकं पत्रं लिखत। (5)**

**[मञ्जूषा – वृक्षैः भवतः, गन्तुम्, गतसप्ताहे, वीकानेरतः, वयं एव, नमस्ते। ]**

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत। (1 × 5 = 5)**



**[मञ्जूषा – बालः, पश्यतः, बाल:, वृक्षः, हरितः, पुष्पे, पादपाः, पत्राणि, पश्यन्ति ]**

**अथवा**

**निम्नलिखितं विषयम् अधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतेवाक्यैः एकम् अनुच्छेदं लिखत ।**

**'अस्माकं भारतम्'**

**[मञ्जूषा – प्राचीन देशः, बहुविधाः, आचाराः विचाराः, अनेकाः, भाषाः, विविधानि एकसूत्र बद्धाः, सुदृढ़ भावना, सांस्कृतिक एकता, निवसन्ति, भारतम् अस्ति मतानि, अनेके धर्माः जनाः, भेदं विहाय परस्परं प्रेमपूर्वकं सर्वत्र दृश्यते, नागरिकेषु, मनसि वयं प्रथमम् भवति।]**

**4. अधोलिखितानि वाक्यानि संस्कृतभाषाया अनूद्य लिखत । (केवलं वाक्यपञ्चकम् )** **(1 × 5 = 5)**

(i) राम और लक्ष्मण वन में गए। Ram and Laxman went to the jungle.

(ii) वह गाँव जाएगा। He will go to the village.

(iii) पिता के साथ पुत्र बाजार जाता है। Father along with son, go to the market.

(iv) कौशल्या राम की माता है। Koshalya is the mother of Ram.

(v) कल मैं गाँव जाऊँगा । Tomorrow I will go to the village.

(vi) मैंने खाना खाया। I ate the food.

(vii) कल सोमवार था। Yesterday was Monday.

**(खंड 'ग')**

**अनुप्रयुक्त व्याकरणम्।(25 अङ्काः)**

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धि / सन्धिविच्छेदं वा कुरुत। (केवलं प्रश्नचतुष्टयम्)** **(1 × 4 = 4 )**

(i) मन्ये वायोः + इव सुदुष्करम्।

(ii) सूर्यः प्रातः + उदेति।

(iii) एतत् राजासनं न युक्तमध्यासितुम्।

(iv) मनोहरं इदम् उद्यानम्।

(v) जगत् + ईश्वरः प्राणिनाः रक्षकोऽस्ति।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)** **(1 × 4 = 4)**

(i) त्यागसमं सुखं नास्ति।

(क) त्यागात् समम् (ख) त्यागेन समम्

(ग) त्यागस्य समम् (घ) त्यागैः समम्

(ii) का सुखदा ? साधुजन मैत्री ।

(क) सुखस्य दात्री (ख) सुखं ददाति सा

(ग) सुखः ददाति (घ) सुखं ददाती

(iii) अहो न ज्ञानं भवत्याः।

(क) न ज्ञाने (ख) नः ज्ञाने

(ग) अज्ञानम् (घ) अज्ञाने

(iv) <u>मातापितरौ</u> पूजनीयौ।

(क) मातुः पितु च (ख) मातरौ पितरौ च

(ग) माता च पिता च (घ) मात्रोः पित्रो च

(v) तत् <u>सचित्रं</u> पुस्तकम् अत्र आनय।

(क) चित्रस्य समीपे (ख) चित्रस्य पश्चातः

(ग) चित्रेण सहितम् (घ) चित्रस्य अभावः

**7. अधोलिखित वाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)** **(1 × 4 = 4)**

(i) भ्रष्टाचारेण अस्माकं <u>समाज + ठक्</u> पतनं भवति।

(क) सामाजिकम् (ख) सामाजिक: (ग) सामाजिक (घ) समाजिकी

(ii) परिश्रमस्य बहु <u>महत्त्वं</u> भवत

(क) महतवं + त्व (ख) महत् + त्व (ग) महता + त्व (घ) महानता + त्व

(iii) भवनस्य <u>सुन्दर + तल्</u> दर्शनीया अस्ति।

(क) सुन्दरम् (ख) सुन्दरतल् (ग) सुन्दरतम् (घ) सुन्दरता

(iv) एषा <u>चतुरा</u> बालिका अस्ति।

(क) चतुरता + टॉप् (ख) चतुरम् + टाप् (ग) चतुर् + टाप् (घ) चतुः + टाप्

(v) <u>बलवती</u> हि आशा।

(क) बली + मतुप् (ख) बल + मतुप् (ग) बल + णिनि (घ) बल + वत्

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत । (केवलं प्रश्नत्रयम्)** **(1 × 3 = 3)**

(i) **कविता** सुदेश किम् त्वं _______________ (चित्र) पश्यसि?

(क) चित्रम् (ख) चित्र (ग) चित्रे (घ) चित्रस्य

(ii) **सुदेशः** आम कविते! मया चित्रं _______________ (दृश)।

(क) दृश्यते (ख) दृश्यत्ते (ग) दृश्यसे (घ) दृश्ये

(iii) **कविता** अस्मिन् चित्रे एषः बालकः किं _______________ (कृ) ?

(क) क्रियते (ख) करोषि (ग) कुर्वन्ति (घ) करोति

(iv) त्वया किम्

(क) करोषि (ख) करिष्यति (ग) क्रियते (घ) क्रियसे

**9. कालबोधकशब्दैः अधोलिखितं दिनचर्यां पूरयत ।(केवलं प्रश्नचतुष्ट्यम्)** **(1 × 4 = 4)**

(i) रामू (4:45) _______________ वादने पशुभ्यः घासं ददाति।

(ii) स: (5:15) _______________ वादने गां दोग्धि।

(iii) स: (6:00) _______________ वादने क्षेत्रं गच्छति।

(iv) स (6:30) _______________ वादने हलकार्यं करोति।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत।**
**(केवलं प्रश्नत्रयम् )** **(1 × 3 = 3)**

**[मञ्जूषा –वृथा, अपि इदानीम् अधुना।**

(i) ते _______________ एव अत्रागमिष्यन्ति।

(ii) _______________समयं न यापयेम।

(iii) त्वम् _______________ पठ।

(iv) छात्राः _______________ किं करिष्यन्ति?

**11. अधोलिखितवाक्येषु रेखाङ्कित अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखित।**
**(केवलं प्रश्नत्रयम्)** **(1 × 3 = 3 )**

(i) <u>रामः</u> हसामि।

(क) अहम् (ख) त्वम् (ग) युवाम् (घ) कलमः

(ii) <u>बालकः</u> विद्यालयं गच्छतः।

(क) बालकम् (ख) बालकौ (ग) बालकाः (घ) बालिकाः

(iii) भारतीय विज्ञानं <u>सर्वहितस्य</u> अस्ति ।

(क) सर्वहितेषी (ख) सर्वहिताय (ग) सर्वहितेभ्य (घ) सर्वहिताः

(iv) <u>सः</u> बालकं पश्यसि।

(क) त्वम् (ख) सा (ग) यूयम् (घ) अहम्

## खंड 'घ'

## पठितावबोधनम् । (30 अङ्काः)

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । (5 अङ्काः)**

सः भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच- "रे दुष्ट! तस्मिन् दिने त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ। न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् सः शवः प्रवारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि "त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः। अतः निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य करादंडं लप्स्यसे" इति।

**I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम् )** **(1/2 × 2 = 1)**

(i) अभियुक्तः कया क्रन्दति स्म?

(ii) कः उच्चैः अहसत्?

(iii) उभौ शवमानीय कुत्र स्थापितवन्तौ?

**II. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम् )** **(1 × 2 = 2)**

(i) क्रन्दनं निशम्य मुदित आरक्षी किम् उवाच?

(ii) केन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ?

(iii) यदा आरक्षिणि निजपक्षं प्रस्तुतवति तदा किम् आश्चर्यमघटत?

**III. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** **(1× 2 = 2)**

(i) 'चोरितायाः मञ्जूषायाः' इत्यनयोः पदयोः विशेषणपदं किम्?

(ii) 'रात्रौ' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ?

(iii) 'स्वपक्षं' इत्यस्य पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम्??

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । (5 अङ्काः)**

**उदीरितोऽर्थः पशुनापि गृह्यते,**
**हयाश्च नागाश्च वहन्ति बोधिताः।**
**अनुक्तमप्यूहति पण्डितो जनः,**
**परेङ्गिताज्ञानफला हि बुद्धयः।।**

**I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम् )** **(1/2 × 2 = 1)**

(i) उदीरितोऽर्थः केन गृह्यते?

(ii) कः अनुक्तमप्यूहति?

(iii) परेङ्गिताज्ञानफला के?

**II. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** **(1 × 2 = 2)**

(i) हयाश्च नागाश्च किं कुर्वन्ति?

(ii) बुद्धयः कीदृशः?

(iii) कः पशुनापि गृह्यते?

**III. निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** **(1 × 2 = 2)**

(i) 'मूढजन' अस्य पदस्य विलोमपदं श्लोके किम्?

(ii) 'गजाः' इति पदस्य कृते किं पर्यायपदं श्लोके प्रयुक्तम्?

(iii) 'वहन्ति' इति क्रियापदस्य कर्तृपदं किम्?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत । (5 अङ्काः)**

**(नेपथ्य)** इयती वेला सञ्जाता रामायणगानस्य नियोगः किमर्थं न विधीयते?

**उभौ**: - राजन्! उपाध्यायदूतोऽस्मान् त्वरयति।

**रामः -** सम्माननीय एव मुनिनियोगः। तथाहि

भवन्तौ गायन्तौ कविरपि पुराणो व्रतनिधिर् गिरां सन्दर्भोऽयं प्रथममवतीर्णो वसुमतीम्।
कथा चेयं श्लाघ्या सरसिरुहनाभस्य नियतं, पुनाति श्रोतारं रमयति च सोऽयं परिकरः।

वयस्य! अपूर्वोऽयं मानवानां सरस्वत्यवतारः, तदहं सुहृज्जनसाधारणं श्रोतुमिच्छामि। सन्निधीयन्तां सभासदः प्रेष्यतामस्मदन्तिकं सौमित्रिः, अहमप्येतयोश्चिरासनपरिखेदं विहरणं कृत्वा अपनयामि। (इति निष्क्रान्ताः सर्वे)

**I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम् )** **(1/2 × 2 = 1)**

(i) कः त्वरयति?

(ii) 'मयापि सम्माननीय एव मुनिनियोगः' इति कः कथयति?

(iii) कस्य इयं श्लाघ्या कथा?

**II. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम् )** **(1/2 × 2 = 2)**

(i) उपाध्यायदूतो कान् त्वरयति?

(ii) मानवानां कस्याः अवतारः अपूर्वः?

(iii) अपूर्वोऽयं मानवानां सरस्वत्यवतारः इति कः कथयति?

**III. निर्देशानुसारम् उत्तरत। (केवल प्रश्नद्वयम्)** **(1× 2 = 2)**

(i) 'समयम्' इति पदस्य पर्यायपदं नाट्यांशे किम्?

(ii) 'रामायणगानस्य नियोगः' इति पदस्य क्रियापदं नाट्यांशात् चित्वा लिखत।

(iii) 'दूरम्' इति पदस्य विलोमपदं नाट्यांशे किं प्रयुक्तम्?

**15. रेखाङ्कित पदानि आधृत्य प्रश्ननिर्माणं कुरुत ।(केवलं प्रश्नचतुष्टयम्)** **(1× 4 = 4)**

(i) सरसः शोभा राजहंसेन भवेत्।

(ii) पतङ्गाः परितः अम्बरपथं आपेदिरे।

(iii) सरसि सङ्कोचम् अञ्चति मीन दुःखी भवति।

(iv) मानी चातकः वने वसति।

(v) प्रमाणाभावात् न्यायाधीशः निर्णेतुं नाशक्नोत् ।

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितं श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत ।** **(1 × 4 = 4)**

**काकः कृष्णः पिकः कृष्णः को भेद पिककाकयोः।**
**वसन्तसमये प्राप्ते काकः काकः पिकः पिकः।।**

अन्वयः काकः (i) _______________ पिकः (अपि) (ii) _______________ पिककाकयोः (iii) _______________ भेदः? (iv) _______________ प्राप्ते काकः काकः पिकः पिकः भवति।

**[मञ्जूषा - कः, वसन्तसमये, कृष्णः, कृष्णः ।]**

**अथवा**

**मञ्जूषायाः सहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत ।** **(1 × 4 = 4)**

**"कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।**
**वाष्पयानमाला सङ्धावति वितरन्ती ध्वानम्।।**
**यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्।**
**शुचि……..।**

**भावार्थः**- (महानगराणां) शतशकटीयानं कज्जलमलिनं (i) _______________ मुञ्चति। वाष्पयानमाला ध्वानम् (ii) _______________ सङ्धावति। हि यानानाम् (iii) _______________ पङ्क्तयः सन्ति। (iv) _______________ कठिनम् अस्ति। शुचि पर्यावरणम्।

**[मञ्जूषा – वितरन्ती, धूमं संसरणं, अनन्ताः।]**

**17. अधोलिखित कथांशं समुचित क्रमेण लिखत ।** **(1/2 × 8 = 4)**

(i) पश्चाद् अनयो द्वितीयः कश्चिल्लक्ष्यते।

(ii) अयमेकस्तावद्विभज्य भुज्यताम्।

(iii) कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः?

(iv) सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यत् पुत्रौ चपेटया प्रहृत्य जगाद्।

(v) मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।

(vi) एकदा बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।

(vii) तत्र राजसिंहः नाम राजपुत्रः वसति स्म।

(viii) अस्ति देउलाख्यो ग्रामः।

**18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत। (केवलं प्रश्नत्रयम्) (1 × 3 = 3)**

(i) दुर्बलः <u>सुते</u> मातुः अधिका कृपा भवति।

(क) पुत्र्याः (ख) पुत्रे (ग) वृषभे (घ) खगे

(ii) सर्वेस्वपत्येषु <u>जननी</u> तुल्यवत्सला भवति।

(क) माता (ख) जनकः (ग) जन्मदात्री (घ) ज्वरः

(iii) रामायण गानस्य <u>वेला</u> सञ्जाता।

(क) श्वतः (ख) समयः (ग) नष्टः (घ) शीघ्रम्

(iv) चित्ते <u>वाचि</u> च समानरूपेण अवकता समत्वम् कथ्यते।

(क) गृहम् (ख) लोकः (ग) हितम् (घ) वाणी

**....All The Best....**

EDUTECH ACADEMY
NURTURING THE FUTURE....
— SCHOOL SECTION —

**CIDCO BRANCH**
9168 444 999
1ST FLOOR, INFRONT OF BALIRAM PATIL SCHOOL

**HARSUL-SAWANGI BRANCH**
9168 044 999
1ST FLOOR, INFRONT OF PANAD SUPER MARKET